ISSN : 2249-5045

# SHODHA SAMIKSHA

# शोधसमीक्षा

[National Journal of Reserch In Education and Sanskrit]



Vol.VII
Refereed Journal

ISSUE-I

January-June 2017
www.shodhasamiksha.com

Scanned by CamScanner

SHODHA SAMIKSHA
NATIONAL JOURNAL OF RESEARCH IN EDUCATION & SANSKRIT
ŚODHA SAMĪKṢĀ (शोधसमीक्षा)

VOL.VII, ISSUE - I, JANUARY-JUNE, 2017

ISSN : 2249-5045

Published by
RATHA SEVA PRATISTHANAM
Sainkul, Keonjhar, Odisha, India, PIN - 758043
E-mail : shodhasamiksha74@gmail.com

Price - Rs. 500/-

Copies - 500

© Copy right reserved

Printed at - Sri Sreenivasa Printers, No.54, TTD Plots, MR Palli, Tirupati,
Mob. +91-9849046190

Scanned by CamScanner

# शुक्लयजुर्वेदे वनस्पतिः

डॉ.शत्रुघ्नपाणिग्राही,
सहायकाचार्यः, वेदवेदाङ्गसङ्कायाध्यक्षः,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
वेरावलम्, गुजराट

।। सारांशः ।।

वेदाः वनस्पतीन् देवरूपान् स्वीकुर्वन्त । शुक्लयजुर्वेदस्याध्ययनेन ज्ञायते यत् वैदिककाले मानवानां जीवनं वनस्पत्याश्रितम् आसीत् । तदा मनुष्यः स्वावश्यकतायाः पूर्तिं तन्माध्यमेन अकरोत् । मनुष्यस्य प्रातरुत्थाय दन्तधावनतः आहारपर्यन्तं, शय्यातश्च गृहनिर्माणपर्यन्तं सर्वत्र वनस्पतीनां प्रयोग एव आसीत् । यज्ञेषु वनस्पतीनां विशिष्टं महत्त्वमासीत् । शुक्लयजुर्वेदे वनस्पतिषु चेतनत्वस्य वर्णनं दृश्यते । वनस्पतयः प्राणरूपाः, ब्रह्मस्वरूपाः, शिवरूपाः, रोगनाशकाः, पर्यावरणसंरक्षकाः , अस्माकं रक्षकाश्च सन्ति । यजुर्वेदे वनस्पतीनामुपयोगः यज्ञकर्मसम्पादमार्थं जातः । वनस्पतयोऽप्यस्मान् सर्वविधव्याधिभ्यः रक्षन्ति । अतः मातर इति पदेन ते सम्बोध्यन्ते । शुक्लयजुर्वेदस्याध्ययनेन ज्ञायते यत्पर्यावरणस्य सन्तुलने वनस्पतीनां योगदानं महत्वपूर्णं वर्तते ।

**उपोद्घातः —**

वनस्पतिः इति शब्दः भ्वादि वन्धातोः अच्प्रत्ययेन निष्पद्यते । लोकेषु वृक्षसमूहानां समाहारः यत्र वर्तते अर्थात् बहुलरूपेण उपलभ्यन्ते तत् स्थानं वनमित्युच्यते ।

अपुष्पाः फलवन्तो ये ते वनस्प्रतयः स्मृताः ।
पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ।।[१]

मनुवचनानुसारं ज्ञायते यत् विनापुष्पेण फलं जायते येषां ते वनस्पतयः, न वृक्षाः । पुष्पिणः फलिनश्च वृक्षा उभययोगात् । क्वचिद्वनस्पतयोऽपि उच्यन्ते, वृक्षवनस्पतिपतिश्च वनस्य पतिः भवति सोमः । वामनावतारे भगवान् वामनस्य उपनयनसंस्कारे चन्द्रः दण्डं प्रदत्तवानासीदिति भागवते श्रूयते – **"दण्डः सोमो वनस्पतिः"** इति । ऋग्वेदस्यान्तर्गतश्रीसूक्ते बिल्ववृक्षस्य स्तुतिर्वनस्पतिरूपेण जाता । तद्यथा — **"आदित्यवर्णे तपसोऽधि जातो वनंस्पतिस्तव वृक्षोऽथ बिल्वः"**[२] इति । आयुर्वेदशास्त्रानुसारं बिल्वपत्रं मधुमेहनाशकं तथा तस्य पक्वफलं पित्तनाशकं वर्तते । एतस्माज्ज्ञायते वृक्षः वनस्पतिरेव ।



Scanned by CamScanner

"चतुर्विधानि शरीराणि तु जरायुजाण्डजोद्भिजस्वेदजाख्यानि" इति वेदान्तसारकारिकानुसारं ब्रह्मण: सृष्टे: चतुर्विधप्रकारेषु उद्भिज्ज: अन्यतम: । ब्रह्मण: अंशभूतोऽयम् उद्भिज इति स्पष्टं भवति ईशावास्योपनिषदि – **"ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्"**[३] इति । अर्थात् ईश्वरेण सृष्टं जगदिदमीश्वरेण पूर्णं नान्यत् । वनस्पतीनामुत्पत्तिविषये श्रूयते शतपथब्राह्मणे यथा – "यदा वर्षत्यथौषधयो जायन्ते, औषधीर्जग्ध्वाप: पीत्वा तत एष रस: सम्भवतीति ।"[४] वनस्पतय: ईश्वररूपा: इति ऋग्वेदेऽपि श्रूयते -

**अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन ।**

**यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद् यद् वा क्षयो मातुरस्या उपस्थे ।।**[५] इति ।

वेदे वृक्षेषु चेतनत्वस्य वर्णनं दृश्यते ।[६] अन्त:संज्ञा भवन्त्येते सुखदु:खसमन्विता: इति मनुना प्रोक्तम् । निरुक्तकारयास्क: स्वकीयनिरुक्तग्रन्थे वनस्पति: द्वादशाप्रीदेवतासु अन्यतम: इति प्रतिपादयति ।[७] अत्र वनस्पति: अग्निदेव: इति शाकपूणि: कथयति ।[८] अग्नि: वनस्पति: कथम् ? यत् एष वनानां पाता पालयिता वा । अन्तर्गतोऽपि नैतान् दहति । श्रूयते शूक्लयजुर्वेदे यथा-

**उपावसृजत्मन्या समञ्जन्देवानां पाथ ऋतुथा हवींषि ।**

**वनस्पति: शमिता देवो अग्नि: स्वदन्तु हव्यं मधुना घृतेन ।।**[९] इति ।

अर्थात् यजमानो वदति हे होत: ! त्वम् आत्मना हवींषि यज्ञकाले देहि । अत्र वनस्पति: गार्हपत्याग्नि:, शमिता दक्षिणाग्नि:, देव: अग्नि: आहवनीयाग्नि:, एते त्रयो हव्यं होत्रा संमृज्य भक्षयन्तु । पुनश्च ऐतरेयब्राह्मणे वनस्पतय: सम्पूर्णजीवजगत: प्राणरूपा: इति श्रूयन्ते । यथा – **"प्राणो वै वनस्पति:"**[१०] इति । यतो हि वैज्ञानिकदृष्ट्या आक्सीजनतत्त्वबहुला: आग्नेयतत्त्वप्रधानाश्च प्राणशक्तियुक्ता:, हाइड्रोजेनतत्त्वबहुला: सोमीयतत्त्वप्रधानाश्चापानशक्तियुक्ता: कथ्यन्ते । आक्सीजनतत्त्वबहुलात् वनस्पतय: प्राणरूपा: भवन्ति । तैत्तिरीयब्राह्मणे श्रूयते वनस्पति: ब्रह्मस्वरूप: । तद् यथा – **"ब्रह्म वनं स ब्रह्म स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षु:"** इति । अपि च वनस्पतय: शिवरूपा: इति शुक्लयजुर्वेदस्य शतरुद्रीयहोमप्रकरणे व्याख्याता । यथा –

**"नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नम:"**[११] इति । वनस्पतय: एव पशूनां (जीवानां) पतय: तस्मादुक्तं श्रुतौ - **"ओषधयो वै पशुपतिरिति"**[१२] इति । यजुर्वेदे ओषधीनामुपयोग: यज्ञकर्मसम्पादनार्थ जात: । पृथिवीलोकस्योपरि अस्यागमनं द्युलोकात्सञ्जातमिति श्रूयते ।[१३] अत: ओषधीनां राज्ञीरूपेण स्तुतिर्जाता । तद्यथा-



Scanned by CamScanner

"चतुर्विधानि शरीराणि तु जरायुजाण्डजोद्भिजस्वेदजाख्यानि" इति वेदान्तसारकारिकानुसारं ब्रह्मण: सृष्टे: चतुर्विधप्रकारेषु उद्भिज्ज: अन्यतम: । ब्रह्मण: अंशभूतोऽयम् उद्भिज इति स्पष्टं भवति ईशावास्योपनिषदि – "ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्"[३] इति । अर्थात् ईश्वरेण सृष्टं जगदिदमीश्वरेण पूर्णं नान्यत् । वनस्पतीनामुत्पत्तिविषये श्रूयते शतपथब्राह्मणे यथा – "यदा वर्षत्यथौषधयो जायन्ते, औषधीर्जग्ध्वाप: पीत्वा तत एष रस: सम्भवतीति ।"[४] वनस्पतय: ईश्वररूपा: इति ऋग्वेदेऽपि श्रूयते -

**अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन ।**

**यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद् यद् वा क्षयो मातुरस्या उपस्थे ।।**[५] इति ।

वेदे वृक्षेषु चेतनत्वस्य वर्णनं दृश्यते ।[६] अन्त:संज्ञा भवन्त्येते सुखदु:खसमन्विता: इति मनुना प्रोक्तम् । निरुक्तकारयास्क: स्वकीयनिरुक्तग्रन्थे वनस्पति: द्वादशाप्रीदेवतासु अन्यतम: इति प्रतिपादयति ।[७] अत्र वनस्पति: अग्निदेव: इति शाकपूणि: कथयति ।[८] अग्नि: वनस्पति: कथम् ? यत् एष वनानां पाता पालयिता वा । अन्तर्गतोऽपि नैतान् दहति । श्रूयते शुक्लयजुर्वेदे यथा-

**उपावसृजत्मन्या समञ्जन्देवानां पाथ ऋतुथा हवींषि ।**

**वनस्पति: शमिता देवो अग्नि: स्वदन्तु हव्यं मधुना घृतेन ।।**[९] इति ।

अर्थात् यजमानो वदति हे होत: ! त्वम् आत्मना हवींषि यज्ञकाले देहि । अत्र वनस्पति: गार्हपत्याग्नि:, शमिता दक्षिणाग्नि:, देव: अग्नि: आहवनीयाग्नि:, एते त्रयो हव्यं होत्रा संमृज्य भक्षयन्तु । पुनश्च ऐतरेयब्राह्मणे वनस्पतय: सम्पूर्णजीवजगत: प्राणरूपा: इति श्रूयन्ते । यथा – **"प्राणो वै वनस्पति:"**[१०] इति । यतो हि वैज्ञानिकदृष्ट्या आक्सीजनतत्त्वबहुला: आग्नेयतत्त्वप्रधानाश्च प्राणशक्तियुक्ता:, हाइड्रोजेनतत्त्वबहुला: सोमीयतत्त्वप्रधानाश्चापानशक्तियुक्ता: कथ्यन्ते । आक्सीजनतत्त्वबहुलात् वनस्पतय: प्राणरूपा: भवन्ति । तैत्तिरीयब्राह्मणे श्रूयते वनस्पति: ब्रह्मस्वरूप: । तद् यथा – **"ब्रह्म वनं स ब्रह्म स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षु:"** इति । अपि च वनस्पतय: शिवरूपा: इति शुक्लयजुर्वेदस्य शतरुद्रीयहोमप्रकरणे व्याख्याता । यथा –

**"नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नम:"**[११] इति । वनस्पतय: एव पशूनां (जीवानां) पतय: तस्मादुक्तं श्रुतौ - **"ओषधयो वै पशुपतिरिति"**[१२] इति । यजुर्वेदे ओषधीनामुपयोग: यज्ञकर्मसम्पादनार्थं जात: । पृथिवीलोकस्योपरि अस्यागमनं द्युलोकात्सञ्जातमिति श्रूयते ।[१३] अत: ओषधीनां राज्ञीरूपेण स्तुतिर्जाता । तद्यथा-



Scanned by CamScanner

**अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।**
**आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजा ।।**[३१] इति ।

अर्थात् यज्ञः भवति वृष्टेः कारणात् । वृष्टिर्भवति वनस्पतीनां कारणात् । वनस्पतयः भवन्ति जीवानां कारणात् । "**ओषधयः कल्पताम्**"[३२] इति श्रुतिवचनात् अस्य महत्वं ज्ञातुं शक्यते । अस्माकं जीवनं सरसं मधुमयं कर्तुं वनस्पतीनां योगदानं महत्त्वपूर्णं वर्तते । एतदर्थं लोकवचनं स्मर्यते यथा –

**दशकूपसमो वापी दशवापीसमो ह्रदः ।**
**दशह्रदः समः पुत्रो दशपुत्रसमो द्रुमः ।।**[३३] इति ।

परन्तु वनस्पतीनां संरक्षणं कथं भविष्यति इदानीन्तनसमये चिन्तायाः विषयः वर्तते । यतो हि इदानीं वृक्षाणां च्छेदनं बहुलतया भवति । पुनश्च "अग्निहोत्रेण अस्य विश्वस्य पालनं भवति" इति वचनं दुर्लभं मन्ये । अत एव जनचेतनायाः जागरणस्यावस्यकता अनुभूयते । सर्वेषां मनसि "वनस्पतयः शान्तिः शान्तिरेव शान्तिः"[३४] इति भावना यदि जागरिता न स्यात् तर्हि अचिरादेव संसारस्य विनाशः भविष्यति इत्यत्र नास्ति कोऽपि सन्देहस्यावकाशः । इति ।

## — टिप्पणी —

१) मनुस्मृतिः - १/४७
२) ऋग्वेदः - श्रीसूक्तम्, परिशिष्टखिलसूक्तम्
३) शुक्लयजुर्वेदकाण्वशाखा- ४०/१
४) शतपथब्राह्मणम् – २/३/१/१६
५) ऋग्वेदः - ३/८/१
६) तै.सं. – १/२/१/१
७) निरुक्तम् – ८/३
८) देवेभ्यो वनस्पते हवींषि
हिरण्यपर्ण प्रदिवस्ते अर्थम् ।
प्रदक्षिणिद्रशनया नियूय
ऋतस्य वक्षि पथिभी रजिष्ठैः ।। (मै. सं -४/१३/७, निरुक्तम् – ८/३)
९) शुक्लयजुर्वेदः - २९/३५
१०) ऐतरेयब्राह्मणम् – २/४/१०, ६/४/१
११) शुक्लयजुर्वेदः - १६/१९
१२) शतपथब्राह्मणम् - ६/१/३/१२
१३) अवपतन्तीरवदन्दिव ओषधयस्परि ।
यं जीवमश्नवामहै न स रिष्याति पूरुषः ।।
(शुक्लयजुर्वेदः - १२/९१)
१४) शुक्लयजुर्वेदः - १२/९३
१५) शुक्लयजुर्वेदः - १२/७५
१६) अथर्ववेदसायणभाष्यम् - १/२३/१
१७) शतपथब्राह्मणम् - २/२/४/५
१८) निरुक्तम् – ९/२२
१९) ऋग्वेदः - ५/४१/११
२०) शुक्लयजुर्वेदः - १२/७७
२१) नाशयित्री बलासस्यार्शस उपचितामसि ।
२२) अथो शतस्य यक्ष्माणां पाकारोरसि नाशिनी । (शुक्लयजुर्वेदः - १२/९७)
२३) अथर्ववेदः - २/४/३
२४) शुक्लयजुर्वेदः - १२/७८



Scanned by CamScanner

२५) शुक्लयजुर्वेदकाण्वशाखा- ६/२०

२६) यत्रौषधी: समग्मत राजान: समिताविव ।
विप्र: स उच्यते भिषग्रक्षोहामीवचातन: ।। (शुक्लयजुर्वेद: - १२/८०)

२७) सुमित्रिया न आप ओषधय: सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान्द्वेष्टि यं च वयं द्विष्म: ।। (शुक्लयजुर्वेदकाण्वशाखा - ३६/२३)

२८) दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम् ।
अथोत्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ।। (शुक्लयजुर्वेद: - १२/१००)

२९) अथर्ववेद: - १/३२/१

३०) मनुस्मृतौ – ११/६३

३१) मा काकम्बीरमुद् वृहो वनस्पतिमशस्तीर्वि हि नीनश: । ऋग्वेद: - ६/४८/१७

३२) मनुस्मृति: - ३/६६

३३) शुक्लयजुर्वेदकाण्वशाखा - १५/१६

३४) हिमाद्रि - १३

३५) शुक्लयजुर्वेदकाण्वशाखा - १५/१७

## — अनुशीलितग्रन्थसूची —


(१) शुक्लयजुर्वेद संहिता-पदपाठ उवट्ट-महीधरभाष्यसंवलित तत्वबोधिनि हिन्दीव्याख्योपेता, संकलक: पणशीकरोपाह्वो वासुदेवशर्मा,चौखम्बा विद्याभवन, वाराणसी , १९९२ ।

(२) शतपथब्राह्मणम् , डॉ. अल्बेर्तेन वेबेरेण शोधितम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी ।

(३) ऋग्वेदसंहिता- श्रीमत्सायणाचार्यविरचितभाष्यसमेता, वैदिकसंशोधन मण्डल, पुने, १९०५ ।

(४) निरुक्तम् – छज्जुराम शास्त्री, मेहरचन्द्र लछमनदास पब्लिकेशन्स,नईदिल्ली,१९९३ ।

(५) मनुस्मृति: - सम्पादक पं गंगानाथ झा , परिमल पब्लिकेशन्स, २००४ ।

(६) अथर्ववेद – सायणभाष्यसहित, चौखम्बा विद्याभवन, वाराणसी ।

(७) ऐतरेयब्राह्मणम् – सुखप्रदाख्यवृत्ति सहितम्, नागपब्लिसर्स,१९९१ ।

(८) शुक्लयजुर्वेदकाण्वसंहिता- आनन्दबोध अनन्ताचार्य विरचित भाष्यद्वयसमेता, वैदिकसंशोधन मण्डल, पुने, १९९९ ।


——— o ———



Scanned by CamScanner